दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् माघशुक्लत्रयोदशी
माघ 18 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-100 | 1 | जनवरी 31, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 हिमाचलस्य नदीनां दुर्दशाविषये 'एनजीटी' (NGT) कठोरम्; केन्द्र-राज्यसर्वकारौ प्रति प्रेषितं सूचनापत्रम्

4 सर्वभारतीये चतुर्थक्षेत्रीयरूपकमहोत्सवे कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयस्य नाटकं श्रमफलम् इति उपविजेतृपदम् अवाप्तम्

5 ईश्वरप्रार्थनायां विशेषतया कृपाशक्तिः तिष्ठति। मनुष्यस्य अन्तःकरणे स्थितं शोकचिन्ताक्लेशादिकं प्रार्थनायाः सत्प्रभावतः दूरं गच्छति।


## नव-देहल्यां भारत-अरब-देशानां विदेशमन्त्रिणां द्वितीयं सम्मेलनम् आयोजयिष्यते

भारत-अरवदेशीयविदेशमन्त्रिणाम् ऐषमः द्वितीयम् सम्मेलनम् नवदिल्लीमध्ये आयोज्यते। अस्य सम्मेलनस्य सह-अध्यक्षत्वं भारतदेशेन संयुक्त अरब-एमिरेट्स देशेन च सम्भूय क्रियते। अस्मिन् सम्मेलने अरब-संघस्य सदस्यदेशानां विदेशमन्त्रिणः तथा अरब-संघस्य महासचिवः अपि सम्मिल्य भागं ग्रहीष्यन्ति। एतद्धि भारत-अरब-विदेशमन्त्रिणां प्रथमं सम्मेलनम् अस्ति यद्धि भारतदेशेन नवदिल्लीमध्ये समायोज्यते। अस्य सम्मेलनस्य उद्देश्यः पञ्च प्राथमिक-क्षेत्रेषु परस्परं साहमत्यानाम् अधिकं सुदृढीकरणम् अस्ति। एतेषु प्राथमिक क्षेत्रेषु राजनीतिक-सहयोगः, व्यापार-निवेशः, ऊर्जा, सांस्कृतिक विनिमयः, क्षेत्रीय-वैश्विक-विषयेषु समन्वयश्च अन्तर्भवन्ति। विदेश-मन्त्रालयस्य अनुसार, एतत् सम्मेलनं भारत-अरब-देशानां दीर्घकालिक सहयोगाय नवीनां दिशां दर्शयिष्यति, परस्परं विश्वासं च अधिकं सुदृढे करिष्यति।

## छत्तीसगढ़-राज्ये सुकमा-मण्डले चत्वारः माओवादिनः आत्मसमर्पणं कृतवन्तः



छत्तीसगढ़-राज्ये सुकमा-मण्डले चत्वारः माओवादिनः आत्मसमर्पणं कृतवन्तः । शरणागतानां माओवादिनां मध्ये द्वे महिले स्तः। तेषु अष्टलक्षरूप्यकाणां पुरस्कारस्य घोषणा कृता आसीत्। सुकमा जनपद-मुख्यालये आयोजिते कार्यक्रमे माओवादिनः शखाणि समर्पितवन्तः, यत्र बस्तर क्षेत्र-आरक्षि-महानिरीक्षकः सुन्दरराज पी, सुकमा-आरक्षि-अधीक्षकः किरण चौहानः, अन्येपि वरिष्ठ-सुरक्षा-बलाधिकारिणः च उपस्थिताः आसन्। आत्मसमर्पणावधौ माओवादिनः एकेन एस्. एल्. आर्. इत्यनेन सह चत्वारि शखाणि आरक्षकेभ्यः समर्पितवन्तः। एते माओवादिनः मण्डलस्य गोल्लापल्ली, कोण्टा, किस्ताराम् इत्येतेषु क्षेत्रेषु सक्रियाः आसन्।

## केन्द्रीय-गृहमन्त्री अमितशाहः असम-राज्ये सप्तदश-शत-कोटि-रूप्यकाधिक मूल्ययुक्तानाम् अनेकासां विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च कृतवान्



केन्द्रीय-गृहमन्त्री अमितशाहः असम-राज्ये सप्तदश-शत-कोटि-रूप्यकाधिक मूल्ययुक्तानां अनेकासां विकास परियोजनानां उद्घाटनं कृतवान् तथा च कतिपय-परियोजनानां शिलान्यासमपि अकरोत्। डिब्रूगडनगरे जनसभां सम्बोधयन् श्रीशाहः अवदत् यत् भारतस्य यूरोपीय संघस्य च मुक्तव्यापार-समन्वयेन यूरोपीय देशेषु असमस्य चायोत्पाद - निर्यातस्य वृद्धिः भविष्यति। एतासु परियोजनासु परियोजनाः मार्ग-विकासः, आधारभूत संरचना, जनोपयोगि-सुविधाः, क्षेत्रीय-विकाससम्बद्धाश्च अन्तर्भवन्ति। अस्मिन् अवसरे श्री-अमितशाहः अवदत् यत् केन्द्र-सर्वकारः पूर्वोत्तर राज्याणां समग्र विकासाय दृढ संकल्पितः अस्ति, असम-राज्यं च विकासस्य नवं केन्द्रं कर्तु निरन्तरं प्रयत्नाः क्रियन्ते। एताभिः परियोजनाभिः एकतः जीविकानां नवा अवसराः सृजिताः भविष्यन्ति, अपरतश्च राज्यस्य अर्थव्यवस्थापि सबलीभविष्यति। कार्यक्रमे राज्य सर्वकारस्य वरिष्ठाः अधिकारिणः जनप्रतिनिधयश्च उपस्थिताः आसन्।

## राष्ट्रपितुः महात्म-गान्धिनः अष्टसप्ततितम्यां पुण्यतिथौ राष्ट्रेण समर्पिताः श्रद्धाञ्जलयः



राष्ट्रपितुः महात्म-गान्धिनः अष्टसप्ततितम्यां पुण्यतिथौ राष्ट्रेण तस्मै श्रद्धाञ्जलयः समर्पिताः। राष्ट्रपति-उपराष्ट्रपति-प्रधानमन्त्रिभिः च सहिताः अनेके गणमान्याः राजघट्टे बापूसमाधिं गत्वा तस्मै नमोवाकं प्रशास्य श्रद्धांजलीन् समार्पयन्। अस्मिन् अवसरे सर्वधर्म-प्रार्थना सभापि आयोजिता, अहिंसा-सत्य-शान्ति-सन्देशः च स्मारितः। देशस्य विविधेषु भागेषु अपि श्रद्धाञ्जलि कार्यक्रमाः सम्पन्नाः। महात्म-गान्धिनः आदर्शाः अद्यापि देशे विश्वे च सर्वेषां मार्गदर्शनं कुर्वन्ति।

## कर्णाटके कथितस्य मद्य-भ्रष्टाचार-प्रकरणे भाजपेति दलेन काङ्ग्रेस् पक्षस्य उपरि प्रहारः कृतः

कर्णाटके कथितस्य मद्य-भ्रष्टाचार-प्रकरणे भाजपेति दलेन काङ्ग्रेस् पक्षस्य उपरि प्रहारः कृतः। नवदिल्ल्यां वार्ताहर-सम्मेलनं सम्बोधयन् भाजपेति दलस्य प्रवक्ता सुधांशु त्रिवेदी अवदत् यत् अयं आरोपः भाजपेति दलेन विपक्ष-दलैः वा न, अपितु राज्यस्य वाईन-मर्चेण्ट-एसोसियेशन- इत्यनेन आरोपितः अस्ति इति। श्री त्रिवेदिना मैसूरु-नगर-विकास-प्राधिकरणेन आवासानां आवण्टने कथित-अनियमिततायाः उल्लिखोपि कृतः। सः आरोपितवान् यत् यत्र यत्र काङ्ग्रेस-दलं शासने अस्ति, तत्र तत्र दलं भ्रष्टाचारे संलग्नम् अस्ति, लोक-कल्याणकार्येषु सन्लग्नं नास्ति इति।

## भारतदेशस्य विकसितदेशत्वेन प्रवर्तनपथे सम्पूर्णतया अनुरूपम् अस्ति भारतस्य यूरोपसंघस्य साहमत्यम्

प्रधानमन्त्री श्री नरेंद्र मोदी महोदयः उक्तवान् यत् "भारतस्य यूरोपसंघस्य च मध्ये विहितं मुक्त-व्यापार-साहमत्यं भारतदेशस्य विकसित देशत्वेन प्रवर्तनपथे सम्पूर्णतया अनुरूपम् अस्ति।" अत्रावसरे प्रधानमन्त्रिणा वाणिज्य-उद्योगमन्त्रिणः श्री पीयूष गोयलस्य निखितं लेख सामाजिकसञ्चालमाध्यमे विनिमयीकृत्य प्राकाश्यं नीतम्। प्रधानमन्त्रिणा उक्तम् यत् "अस्माभिः एकः परिवर्तनकरं साहमत्यं विहितं येन विपण्यः विस्तारः विधीयते, जीविकानां सूजनं विधीयन्ते, देशस्य मूलहितानि च संरक्ष्यन्ते।"

**"भारत-यूरोपीयसंघ-मुक्त-व्यापार-सन्धिः देशस्य निर्यातस्य इतिहासे कूषीय पाषाणः जातः- अजयसिंहः**

भारतीय-निर्यात-संघटनसंघस्य महासचिवः श्री अजयसिंहः उक्तवान् यत् "भारत-यूरोपीयसंघ-मुक्त-व्यापार-सन्धिः देशस्य निर्यातस्य इतिहासे कूषीय पाषाणः जातः अस्ति। एषा सन्धिः भारतस्य यूरोपीयसंघे निर्याताय आपणप्रवेशं सुनिश्चिनोति। अस्य परिणामेन भारतदेशः लाभं प्राप्स्यति।"

## सुभाषितम्

**कुलीनमकुलीनं वा, वीरं पुरुषमानिनम्।**
**चरित्रमेव व्याख्याति, शुचिं वा यदि वाऽशुचिम्॥**

भावार्थः- मनुष्य के चरित्र से ही ज्ञात होता है कि वह कुलीन है या अकुलीन, वीर है या दम्भी, पवित्र है या अपवित्र।


दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## स्थिरं शान्तिमयं च विश्वं स्थापयितुं बहुध्रुवीयता अपरिहार्य साधनम् अस्ति-एण्टोनियो गुटेरस



संयुक्तराष्ट्रमञ्चस्य महासचिवः श्री एण्टोनियो गुटेरेस साहमत्यमिदं प्रवर्तयन् प्रोक्तवान् यद् एतादृशं साहमत्यं "बहुध्रुवीयतायाः समर्थनार्थ नितान्तमेव आवश्यकम्। अमुना एतदपि प्रोक्तं यत् स्थिरं शान्तिमयं च विश्वं स्थापयितुं बहुध्रुवीयता अपरिहार्य साधनम् अस्ति। वैश्विकसंरचनाः, संस्थाः च नवसमयस्य वास्तविकतायाः जटिलतां अवसरांश्च प्रतिबिम्बयितुं अर्हन्ति।"

# हिमाचलस्य नदीनां दुर्दशाविषये 'एनजीटी' (NGT) कठोरम्; केन्द्र-राज्यसर्वकारौ प्रति प्रेषितं सूचनापत्रम्



**हिमसंस्कृतवार्ताः - कार्यालयीय प्रतिनिधिः।** राष्ट्रिय-हरित-अधिकरणेन (NGT) हिमाचलप्रदेशस्य शतद्रु (सतलुज), विपाशा (ब्यास), इरावती (रावी) तथा चन्द्रभागा (चिनाब) नदीषु वर्धमानस्य प्रदूषणस्य, अवैध-खननस्य, अतिक्रमणस्य च विषये कठोरः पदक्षेपः स्वीकृतः। अधिकरणेन केन्द्रसर्वकारः, हिमाचल-पञ्जाब-जम्मू-कश्मीर-राज्याणि तथा च सम्बद्धान् प्रदूषण-निवारण-परिषदः प्रति सूचनापत्रं (नोटिस) प्रेषितम्।
एनजीटी-पक्षतः स्पष्टीकृतं यत् हिमाचलस्य नद्यः केवलं राज्यस्य न, अपितु सम्पूर्ण-उत्तर-भारतस्य 'जीवनरेखाः' सन्ति। अयं विषयः आवेदन-सङ्ख्या ४१३/२०२५ अन्तर्गतं 'अभिष्त कुसुम गुप्ता' इत्यस्य याचिकया आरब्धः।

## याचिकायां मुख्यारोपाः

१. औद्योगिक-अपशिष्टम् - हिमाचलस्य नदीनां तटे अनियन्त्रितरूपेण औद्योगिक-मलिनं (Industrial waste) त्यज्यते।
२. अवैध-खननम् - नदीषु वृहत्स्तरे अवैध-खननं प्रचलति, येन नद्याः स्वरूपं विनश्यति।
३. अतिक्रमणम् - नद्याः तटेषु जल-प्रवाह-क्षेत्रेषु (Flood zones) अवैध-निर्माणं क्रियते, येन पर्यावरणस्य महती हानिः भवति।
४. न्यायालयस्य कार्यविधिः
एनजीटी-अध्यक्षः न्यायमूर्तिः प्रकाश श्रीवास्तवः तथा विशेषज्ञ-सदस्यः डॉ. ए. सेन्थिल वेलः च प्रारम्भिक-श्रवणकाले सर्वान् प्रतिवादीन् प्रति सूचनापत्रं प्रेषितुं आदेशं दत्तवन्तौ। २८ जनवरी दिनाङ्के जातस्य श्रवणस्य (Hearing) समये ज्ञातं यत् केचन पक्षाः अद्यापि सूचनां न प्राप्तवन्तः। अतः अधिकरणेन 'स्पीड-पोस्ट्' (Speed Post) माध्यमेन पुनः सूचना-प्रेषणस्य निर्देशः दत्तः।
अस्मिन् प्रकरणे मण्डी, कुल्लू, लाहौल-स्पीति, किन्नौर, चम्बा, हमीरपुरं, काङ्गडा च जनपदानां उपायुक्ताः (DC) अपि प्रतिवादिनः कृताः सन्ति। प्रकरणस्य आगामि-श्रवणं २८ अप्रैल दिनाङ्के भविष्यति।

## मनरेगा-योजनायां परिवर्तनस्य विरुद्धं सर्वकारस्य घण्टाद्वयस्य उपवासः

हिमसंस्कृतवार्ताः - शिमला। मनरेगा-योजनायां कृतस्य परिवर्तनस्य विरोधे हिमाचलसर्वकारेण ऐतिहासिके रिज-प्राङ्गणे महात्मागान्धिनः प्रतिमायाः समक्षं घण्टाद्वयं यावत् 'उपवासः' कृतः। मुख्यमन्त्री सुखविन्द्रसिंहसुक्खू, उपमुख्यमन्त्री मुकेश अग्निहोत्री, मन्त्रिमण्डलस्य सदस्याः, विधायकाः च अस्मिन् उपवासे सम्मिलिताः अभवन्। हिमाचल-काङ्ग्रेस-प्रभारी रजनी पाटिल तथा प्रदेशाध्यक्षः विनयकुमारः अपि अस्मिन् आन्दोलने उपस्थिताः आसन्।मुख्यमन्त्री सुक्खू महोदयः अवदत् यत् हिमाचलप्रदेशे मनरेगा-अन्तर्गतं पञ्चायतैः रोजगारस्य अवसराः सृज्यन्ते स्म, ये अधुना केन्द्रसर्वकारेण समापिताः।

## पञ्चायत-शक्तीनां ह्रासः

पूर्वं पञ्चायतप्रधानाः योजनाः निर्माय ग्रामेषु मार्गाणां निर्माणं कुर्वन्ति स्म, येन महिलाभ्यः युवकेभ्यः च गृहसमीपे एव जीविकावसरः लभ्यते स्म। सः आरोपं कृतवान् यत् भाजपा-सर्वकारेण न केवलं योजनायाः नाम परिवर्तितं, अपितु अस्याः 'आत्मा' अपि विनष्टा। पूर्वं शतप्रतिशतं (100%) धनं केन्द्रसर्वकारः ददाति स्म, परन्तु अधुना ९०:१० इत्यस्य प्रतिबन्धः (Condition) आरोपितः, येन राज्यानां भारः वर्धितः।

## काङ्ग्रेस-नेतॄणां विचारः

कांग्रेसदलस्य राज्यप्रभारी रजनीपाटिल अवदत् यत् 'एआईसीसी' (AICC) इत्यस्य आदेशानुसारं 'मनरेगा बचाओ संग्रामः' प्रचलति। मनरेगा पूर्वप्रधानमन्त्रिणः मनमोहनसिंहस्य सोनियागान्धिनः च स्वप्नः आसीत्, यः अधुना सङ्कटे अस्ति।
प्रदेशाध्यक्षः विनयकुमारः अवदत् यत् इयं योजना ग्रामिणेभ्यः शतदिनानां (100 days) रोजगारस्य निश्चयं यच्छति स्म। भाजपा-सर्वकारेण योजनायाः स्वरूपं पूर्णतः परिवर्तितम्।
शुक्रवासरे आयोजितस्य अस्य उपवासस्य समये बहुसङ्ख्याकाः मनरेगा-श्रमिकाः, पञ्चायत-प्रतिनिधयः, विविध-निगमानां अध्यक्षाः च उपस्थिताः भूत्वा केन्द्रसर्वकारस्य नीतीनां विरोधं कृतवन्तः।

# शिमला-चण्डीगढ़योः मध्ये 'हैली टैक्सी' सेवायाः उड्डयनम्



**हिमसंस्कृतवार्ताः- शिमला।** शिमला-चण्डीगढ़योः मध्ये शुक्रवासरे 'हैली टैक्सी' सेवायाः सफलम् उड्डयनं जातम्। अस्मिन् क्रमे चण्डीगढ़तः शिमलां प्रति तथा शिमलातः चण्डीगढ़ प्रति ५-५ यात्रिणः प्रयाणं कृतवन्तः। अस्याः सेवायाः माध्यमेन यात्रिणः केवलं ३० निमेषेषु (30 minutes) स्वगन्तव्यं प्राप्तवन्तः, यदा तु मार्गेण प्रायः ३ तः ४ होराः (hours) समयः यापितः भवति।

**समयसारिणी सञ्चालनं च (Timetable & Operations):**
'पवन हंस लिमिटेड' (Pawan Hans Limited) इति संस्था सप्ताहे दिनत्रयं- सोमवासरे, शुक्रवासरे, शनिवासरे च एतां सेवां सञ्चालयिष्यति। अस्य समयसारिणी एवमस्ति-
चण्डीगढ़तः प्रस्थानम्- प्रातः ९:१५ वादने।
सञ्जोली (शिमला) आगमनम्- प्रातः ९:५० वादने।
सञ्जोलीतः प्रस्थानम्- प्रातः ९:५५ वादने।
चण्डीगढ़ आगमनम्- प्रातः १०:३० वादने।

**पृष्ठभूमिः अन्यसेवाः चः-**
उल्लेखनीयं वर्तते यत् मुख्यमंत्री सुखविन्दरसिंहसुक्खुमहोदयः गते २१ जनवरी दिनाङ्के सञ्जोली-हेलीपोर्टतः एतस्याः सेवायाः (हैली हॉप) शुभारम्भं कृतवान् आसीत्। परन्तु प्रचण्ड-हिमपातस्य कारणेन कतिपय-दिनानि उड्डयनानि स्थगितानि आसन्।
वर्तमानकाले 'हैरिटेज एविएशन' (Heritage Aviation) इति संस्था सप्ताहे सप्तदिनानि निम्नलिखितसेवाः अपि प्रदास्यति:
१. सञ्जोली-रिकाङ्गपिओ- प्रतिदिनं १ उड्डयनम्।
२. सञ्जोली-कुल्लू- प्रतिदिनं २ उड्डयने।

## जयशंकरः फिलिस्तीनदेशीयेन विदेशमन्त्रिणा समम् मिलितवान्



जयशंकरः फिलिस्तीन देशीयेन विदेशमन्त्रिणा वर्सेन अघाबेकियन शाहिनेन समम् नवदिल्लीमध्ये मिलितवान्। सामाजिकमाध्यमेषु प्रेषिते लेखे डॉ. जयशंकरः उक्तवान् "अस्माकं मन्त्रणोपवेशने भारत-फिलिस्तीन विकास-सहयोगस्य विषये समीक्षा जाता, तथा तस्य संवर्धनाय प्रयत्नेषु सहमतिरपि अजायत। साकमेव गाजा-शान्ति-योजनाक्रमे क्षेत्रीय घटनाक्रमेषु चापि विचारविनिमयः अभवत्।"

## वीर-चोट्राणीः वॉशिङ्टन नगरे आयोजिते स्कैश-फायर-ओपन-प्रतियोगितायाम् उत्कृष्टं प्रदर्शनं कृतवान्



भारतस्य उदयोन्मुखः स्कैश-क्रीडकः वीर-चोट्राणीः वॉशिङ्टन नगरे आयोजिते स्कैश-फायर-ओपन-प्रतियोगितायाम् उत्कृष्टं प्रदर्शनं कृतवान्। सः पञ्च-स्पर्धात्मके रोमाञ्चक द्वन्द्वे फ्रान्स-देशीयं क्रीडकं वैप्टिस्ट्-मासोत्तीम् पराजित्य चतुर्थ चरणे समर्हणीयतामाप्य प्रवेशं कृतवान्। क्रीडायां धैर्यस्य आक्रामकतायाश्च उत्तमं प्रदर्शनं कृत्वा सः प्रशंसां प्राप्तवान्। एष विजयः भारतीय-स्कैश-क्रीडायाः कृते महत्त्वपूर्णा उपलब्धिः मन्यते। क्रीडा-विशेषज्ञाः तस्य प्रदर्शनस्य प्रशंसां कृत्वा उज्ज्वल भविष्यस्य कामनां कृतवन्तः।

## संयुक्तराष्ट्र-संघस्य प्रमुखः भारत-यूरोपीय संघ-मुक्त-व्यापार साहमत्यं प्राशंसत्



संयुक्त राष्ट्र-संघस्य प्रमुखः भारत-यूरोपीय संघयोः प्रस्तावित-मुक्त-व्यापारसाहमत्यस्य प्रशंसां कृतवान्। सः अवदत् यत् एतत् साहमत्यम् वैश्विक-आर्थिक सहयोगवर्धनाय महत्त्वपूर्णः पदक्षेपः अस्ति। संयुक्त राष्ट्र-प्रमुखः अपि उक्तवान् यत् स्थिरं शान्तिपूर्णा समतुल्यां च विश्व-व्यवस्थां प्रवर्तयितुं बहुध्रुवीयतायाः समर्थनम् अत्यावश्यकम् अस्ति। सः अन्ताराष्ट्रिय समुदायं सहकार्यार्थं, संवादार्थं परस्परं सहयोगार्थं च बलं दातुं समाकारितवान्। एतद् वक्तव्यं वैश्विक आर्थिक-राजनैतिक स्थैर्यस्य सन्दर्भे महत्त्वपूर्णं मन्यते।

# हिमाचलप्रदेशे राजकीय- संस्कृत- शिक्षक- परिषदः राज्यकार्यकारिण्याः राज्यस्तरीया- गोष्ठी

**हिमसंस्कृतवार्ताः- हीरालालः** (कमल) हिमाचलप्रदेशे राजकीय- संस्कृत- शिक्षक- परिषदः नवगठितायाः राज्य- कार्यकारिण्याः प्रथमा राज्यस्तरीया- गोष्ठी फरवरी प्रथमदिनाङ्के बिलासपुरजनपदे घुमारवीस्थिते ऐतिहासिके टकरेड़ा- शिवमन्दिरपरिसरे आयोजयिष्यते।अस्यां गोष्ठयां प्रदेशस्य सर्वेभ्यः जनपदेभ्यः आगताः संस्कृतशिक्षकाः सहभागं करिष्यन्ति अपि च संगठनसम्बद्धेषु महत्त्वपूर्णेषु विषयेषु विचार- विमर्शं करिष्यन्ति। गोष्ठयां संस्कृत-शिक्षकाणां दीर्घकालात् लंबितानां कार्याणाम्, शैक्षणिकसमस्यानां, संस्कृतभाषायाः संरक्षण- प्रचार- प्रसार- विषये विस्तृता चर्चा भविष्यति।एवमेव विद्यार्थिषु संस्कृतविषये रुचिं वर्धयितुं सुदृढा- रणनीतिः निर्मास्यते, परिषदः आगामिनी कार्ययोजना अपि अन्तिमरूपेण निश्चिता भविष्यति।गोष्ठ्याः अध्यक्षतां परिषदः प्रदेशाध्यक्षः आचार्यः कमलकान्तगौतमः करिष्यति।

एतद्विषये कुल्लू-जनपदस्य संस्कृत- शिक्षक- परिषदः अध्यक्षः आचार्यः हीरालाल (कमल) शर्मा सूचयति यत् अस्यां गोष्ठ्यां प्रदेशस्य सर्वेभ्यः जनपदेभ्यः परिषदः पदाधिकारिणः तथा राज्य- कार्यकारिणी- सदस्याः विशेषरूपेण उपस्थिताः भविष्यन्ति। सम्मेलने संगठनस्य वरिष्ठ-पदाधिकारिणः अपि मार्गदर्शनं प्रदास्यन्ति, येषु पूर्व प्रदेशाध्यक्षः डॉ. मनोज शैलः, पूर्व महासचिवः डॉ. अमित शर्मा, पूर्व वित्तसचिवः सोहनलालः, वर्तमानमहासचिवः डॉ. अमनदीपशर्मा, वित्तसचिवः लोकपालः संगठनमन्त्री ललितशर्मा प्रमुखतया उपस्थिताः भविष्यन्ति। एषा गोष्ठी प्रातः ९ वादनादारभ्य अपराह्णे २ वादनपर्यन्तं भविष्यति। ततः अनन्तरं अपराह्णे २:३० वादने बिलासपुरे प्रेसवार्ता आयोजिता भविष्यति, अस्यामेव गोष्ठ्यां स्वीकृतानां निर्णयविषये मीडिया- प्रतिनिधिभ्यः सूचना प्रदास्यते।

## जम्मू-कश्मीर-प्रदेशस्य किश्तवाड़-जनपदे जैश-ए-मोहम्मद-आतङ्कवादि-गुल्मस्य निष्प्रभावीकरणाय सुरक्षा-बलैः आतङ्कवादं विरुध्य सैन्याभियानं तीव्रीकृतम्



जम्मू-कश्मीर राज्यस्य किश्तवाड़-जनपदे जैश-ए-मोहम्मद-आतङ्कवादिनां निष्प्रभावीकरणाय सुरक्षा-बलैः आतङ्कवादं विरुध्य अभियानम् अधिकं तीव्रीकृतम्। एतद् अभियानं दुर्गमेषु संवेदनशीलेषु च स्थलेषु सञ्चाल्यते। सुरक्षाभिकरणानां कथनानुसारेण, आतङ्कवादिनां क्रियाकलापानां विषये गुप्त-सूचनां लब्ध्वा अभियानं प्रवर्तितः अस्ति। तस्मिन् क्षेत्रे अतिरिक्त-बलानां नियोजनमपि कृतमस्ति, आतङ्किनाम् अन्वेषणाभियानं चापि निरन्तरं प्रवर्तते। प्रशासनं स्थानीय-नागरिकान् शान्तिसन्धारणार्थं विधिनियमानां पालनार्थं च निवेदनपूर्वकं सुरक्षा-बलैः सह महयोगं कर्तुमपि अध्यार्थयत्। तत्रत्या सुरक्षा- स्थितिः सततं पर्यवेक्ष्यते।

# केन्द्रीयमन्त्रिणः पीयूषगोयलस्य समक्षम् आयातित- सेबफलस्य शुल्कविषयकः विषयः उत्थापितः- मुख्यमंत्री सुक्खुः



**हिमसंस्कृतवार्ताः- शिमला।** न्यूजीलैण्ड-देशेन सह 'मुक्तव्यापारसम्मत्यानन्तरं' (FTA) यूरोपीयसङ्घस्य (EU) देशेभ्यः भारते आयात्यमानानां सेबफलानां शुल्कं ५० प्रतिशततः न्यूनं कृत्वा २० प्रतिशतं कृतम्। अस्मिन् विषये पृष्टस्य प्रश्नस्य उत्तरे मुख्यमन्त्री सुक्खू महोदयः अवदत् यत् सः केन्द्रीयमन्त्रिणा पीयूषगोयलेन सह न्यूजीलैण्डदेशात् आयातितस्य सेबफलस्य शुल्कन्यूनतायाः विषयं गभीरतया उत्थापितवान्।

## हिमाचलस्य सेब-उत्पादकानां हानिः

यूरोपीयदेशेभ्यः आयातितस्य सेबफलस्य शुल्कन्यूनतया हिमाचलस्य सेब- उत्पादकानां महती हानिः भविष्यति। अस्मिन् विषये केन्द्रीयमन्त्रिणा राज्यसर्वकारः आदिष्टः यत् सः अधिकारिणां कृषकाणां च एकं मण्डलं (Team) प्रेषयतु। तदनन्तरं केन्द्रसर्वकारः अस्य विषयस्य सर्वेषां पक्षाणां गम्भीरतया अन्वेषणं कृत्वा चर्चां करिष्यति। राज्यसर्वकारः एतं विषयं पुनः केन्द्रस्य समक्षं प्रस्थापयिष्यति।

## शॉल-विक्रेतृणाम् उपरि आक्रमणस्य विषयः

प्रदेशे शॉल-विक्रेतृणाम् (Shawl sellers) उपरि जायमानानाम् आक्रमणानां विषये मुख्यमन्त्री अवदत् यत् भारतस्य संविधानानुसारं यः कोऽपि भारतस्य नागरिकः अस्ति, तस्य सुरक्षा अस्माकं दायित्वं वर्तते। कस्यापि कृते नियम-विधानं स्वहस्ते ग्रहीतुम् अनुमतिः न दीयते।



# Shimla Tourism- हिमदर्शनार्थं समागताः पर्यटकाः, कालका- शिमला रेलमार्गे १० फरवरीपर्यन्तं सर्वाणि रेलयानानि पूर्णतः आरक्षितानि

हिमसंस्कृतवार्ताः- शिमला।विश्वधरोहरस्वरूपे कालका–शिमला विश्वधरोहर (हेरिटेज) रेलमार्गे १० फरवरीपर्यन्तं सर्वाणि रेलयानानि पूर्णतः आरक्षितानि सन्ति। टिकटप्राप्तये यात्रिकाणां दीर्घः प्रतीक्षाकालः अपि वर्तते। शिमलायां जातया हिमवृष्ट्या सहस्रशः पर्यटकाः शिमलानगरम् आगच्छन्ति। अधिकांशतः पर्यटकाः रेलयानैः शिमलां गन्तुं पूर्व-आरक्षणं कृतवन्तः। तेन कारणेन कालका–शिमला विश्वधरोहर रेलमार्गे १० फरवरीपर्यन्तं सर्वाः रेलयानसेवाः पूर्णतया आरक्षिताः सन्ति। यात्रापत्रक- आरक्षणार्थम् अपि दीर्घा प्रतीक्षासूची प्रचलति। भारतीयरेलद्वारा कालका–शिमला मार्गे षट् रेलयानानि सञ्चालितानि सन्ति।

**एतानि रेलयानानि पूर्णतया सञ्चालितानि-**

गुरुवासरेऽपि सर्वाणि रेलयानानि पूर्णतया यात्रिकैः सह शिमला रेलस्थानकं प्राप्तानि। एतेषु रेलयानेषु मुख्यतया बंगालप्रदेशात्, गुजरातप्रदेशात्, गोवाप्रदेशात्, महाराष्ट्रप्रदेशात् पर्यटकाः शिमलाम् आगच्छन्ति। ८ तः १० फ़रवरीपर्यन्तं शिवालिक डीलक्स एक्सप्रेस रेलयाने २३, हिमालयन क्वीन रेलयाने ५२, कालका–शिमला एक्सप्रेस ५२४५९ मध्ये १०, ५२४५७ मध्ये १२, ५२४५३ मध्ये १६ तथा कालका–शिमला विशेष रेलयाने ९ यात्रिकाणां प्रतीक्षा सूची वर्तते। अद्यतनकाले कालका–शिमला हेरिटेज मार्गे धावति या "छुक-छुक" इति प्रसिद्धा रेलयानसेवा, तस्या विशेषः आकर्षणः अस्ति। एषा रेलयानसेवा १०३ गुहाभिः गच्छति। अस्मिन् मार्गे लघु- महान्तः ९६९ सेतवः अपि सन्ति।

**डीएचएमयू रेलयानसमूहस्य परीक्षणं सफलम्-**

विश्वधरोहर कालका–शिमला रेलमार्गे डीजल हाइड्रोलिक मल्टीपल यूनिट (डीएचएमयू) रेलयानसमूहे इंजनतापसमस्या समाधानानन्तरं, अधुना वर्षा तथा प्रचण्डवातः नवीनां बाधां सृजतः। विगतदिनेषु असहजवातावरणे कृतपरीक्षणकाले रेलयानसमूहे बहवः दोषाः दृष्टाः। एतस्मात् कारणात् रेलयानं मध्ये- मध्ये विभिन्नस्थानेषु स्थगितं कर्तव्यम् अभवत्। तथापि स्वच्छवातावरणे डीएचएमयू रेलयानसमूहः २८ वेगमानात् ४.७ टनभारसहितः सञ्चालितः, तस्य परीक्षणं सफलं जातम्। किन्तु अधुना नवीनसमस्या आह्वानरूपेण स्थिताऽस्ति। गुरुवासरेऽपि कालकात् समरहिल रेलस्थानकपर्यन्तं डीएचएमयू रेलयानसमूहस्य परीक्षणं कृतम्।

# सर्वभारतीये चतुर्थक्षेत्रीयरूपकमहोत्सवे कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयस्य नाटकं श्रमफलम् इति उपविजेतृपदम् अवाप्तम्



**हिमसंस्कृतवार्ताः- जगदीश डाभी।** केन्द्रीय-संस्कृत- विश्वविद्यालयस्य चतुर्थ- सर्वभारतीय-क्षेत्रीयरूपक- महोत्सवः केन्द्रीय- संस्कृत-विश्वविद्यालयान्तर्गते श्रीसदाशिवपरिसरे २४.०१.२०२६ दिनाङ्कतः २६.०१.२०२६ दिनाङ्कपर्यन्तं महताडम्बरेण परिपालितः। तत्र केन्द्रीय- संस्कृत- विश्वविद्यालयस्य पूर्वक्षेत्रीय-परिसराणाम् आदर्श- संस्कृत- महाविद्यालयानां च कुशीलवानां नाट्यशास्त्रसुपारङ्गतानां संस्कृतछात्राणां रूपकस्पर्धा अभवत्। अत्र भारतवर्षस्य विभिन्नेषु राज्येषु यथा मणिपुरम्, त्रिपुरा, बिहारः, झारखण्डः, ओडिशा, पश्चिमबङ्गः इत्यादिषु समागताः परिसरद्वयं तथा चत्वारः आदर्श- संस्कृत- महाविद्यालयाः भागं गृहीतवन्तः। एतेषु पश्चिमबङ्गस्थ-पूर्वमेदिनीपुर- मण्डलान्तर्गतस्य कलियाचक-विक्रमकिशोर- आदर्श- संस्कृत-महाविद्यालयस्य छात्राः रूपकोत्सवस्य द्वितीयदिवसे आचार्येण सूर्यमणिरथवर्येण विरचितं श्रमफलम् इति नाटकं प्रादर्शयन्। सर्वैः दर्शकैः विद्वद्भिश्च नाटकमिदं सानन्दं सहर्षञ्च प्रशंसितम्। ततः तृतीयदिवसे पुरस्कारवितरणोत्सवे प्रदर्शितेषु सर्वेषु नाटकेषु द्वितीयस्थानम् अवाप्तम्। किञ्च केन्द्रीय-संस्कृत- विश्वविद्यालयस्य अखिलभारतीय-रूपकमहोत्सवे प्रदर्शनार्थं नाटकस्य अस्य चयनं जातम्। अस्मिन् नाटके महाविद्यालयस्य छात्रः अमर-गन्तायतः अभिनेतृरूपेण प्रथमस्थानं सुमनपण्डा द्वितीयस्थानं, तनुश्रीमान्ना तृतीयस्थानम् अलभन्त। अस्य नाटकस्य मार्गदर्शकरूपेण डॉ. संकर्षणपण्डा, डॉ. दयानन्दपाणिग्राही, डॉ. सुरञ्जनपाहाडी च छात्रैः सह आसन्। नाटकस्य अस्य निर्देशकाः आसन् डॉ. सुव्रतषडङ्गिमहोदयाः। महाविद्यालयस्य प्राचार्याः डॉ. व्रजेन्द्रकुमारसिंह देवमहाभागाः रूपकमहोत्सवे समुपस्थाय छात्राणाम् उत्साहवर्धनं कृतवन्तः। महाविद्यालयस्य समेऽपि प्राध्यापकाः कर्मचारिणश्च विजेतॄणां छात्राणां कृते शुभाशयान् अभिनन्दनानि च विज्ञापितवन्तः। महाविद्यालयस्य छात्राणाम् एषा सफलता पश्चिमबङ्गस्य सांस्कृतिकक्षेत्रे नूनं गौरवाय भवति।

# गणतन्त्रदिवसमभिलक्ष्य संस्कृत-मैथिली-भोजपुरीति भाषात्रय्याः कविसम्मेलनम्




**नवीना दिल्ली।** गणतन्त्रदिवसपरिपालनस्य बीटिंग रिट्रीट इति समापनसमारोपदिनस्य पावनोपलक्ष्ये दिल्लीसर्वकारस्य कला-संस्कृति-भाषा-विभागस्य तत्वावधाने दिल्ली संस्कृत अकादम्याः मैथिली-भोजपुरी अकादम्याश्च संयुक्ततत्त्वावधाने राष्ट्रीय कवि सम्मेलनस्य गरिमामयं साहित्यिकमनुष्ठानम् अनुष्ठितम्।

एतस्याः भाषात्रिवेण्याः साहित्यिके सारस्वतानुष्ठाने संस्कृत-मैथिली-भोजपुरी भाषाणां देशस्य कोण-कोण-तः आमन्त्रिताः प्रतिष्ठिताः कवयः सहभागितां कृतवन्तः। सम्मेलनस्य उद्देश्यः भारतीय-भाषाणां काव्य-परम्पराणां संवर्धनं राष्ट्रभावनायाः जागरणञ्च आसीत्। एतस्मिन् अवसरे संस्कृतस्य प्रतिनिधित्वं कुर्वन् संस्कृतकविः डॉ. युवराज भट्टराई वर्यः स्वीयमोजपूर्णस्य, भावसमृद्धस्य राष्ट्रविकासबोधेनानुप्राणितस्य च संस्कृतकाव्यस्य सशक्तं प्रभावपूर्णं च पाठम् अकरोत्। तदीय काव्य-प्रस्तुतौ भारतीय-सांस्कृतिक-चेतनायाः समकालिक-संवेदनायाश्च प्रभावी समन्वयः दृष्टिगोचरीभूतः, यद्धि दर्शकदीर्घायां समवस्थितैः श्रोतृवृन्दैः मुक्तकण्ठेन श्लाघितम्। कविसम्मेलनमिदं राष्ट्रभावस्य, भाषिक-समन्वयस्य, सांस्कृतिकैकात्मतायाश्च सशक्तम् उदाहरणं सिद्धम् अभूत्।

# सर्वकारस्य २०३० पर्यन्तं विद्यालयेषु शत-प्रतिशतं नामांकनस्य लक्ष्यम्

नवदेहली। सर्वकारेण राष्ट्रिय-शिक्षा-नीतेः (एनईपी) अन्तर्गतं शिक्षायां व्यापकं परिष्कारं कुर्वता २०३० तमवर्षपर्यन्तं विद्यालयेषु शत-प्रतिशतं नामांकनस्य लक्ष्यं निर्धारितम्। वित्तमन्त्रिणा निर्मला सीतारामणमहोदयया गुरुवासरे संसदि प्रस्तुते आर्थिक-सर्वेक्षणे २०२५-२६ उक्तं यत् एनईपी-अन्तर्गतं देशस्य शिक्षाव्यवस्थायां व्यापकस्तरे संरचनात्मक-परिष्काराः कृताः सन्ति।

**लक्ष्यम्:-** विद्यालयी-शिक्षायां २०३० पर्यन्तं १०० प्रतिशतं सकल-नामांकन-अनुपातः (GER) प्राप्तव्यः।

**वर्तमाना स्थितिः-** सम्प्रति देशे १४.७ लक्षेषु विद्यालयेषु प्रायः २४.६९ कोटि-छात्राः नामाङ्किताः सन्ति।

**उच्चशिक्षायां प्रगतिः**-सर्वेक्षणानुसारं उच्चशिक्षायाः स्तरे अपि उल्लेखनीया प्रगतिः अभवत्। उच्चशिक्षणसंस्थानां संख्या २०१४-१५ वर्षे ५१,५३४ तः वर्धित्वा जून-२०२५ पर्यन्तं ७०,०१८ अभवत्, येन शिक्षायाः सुलभतायां परिष्कारः जातः।

**प्रमुखसंस्थानानि-** २०१४-१५ तः २०२४-२५ पर्यन्तं प्रमुख-उच्चशिक्षणसंस्थानां संख्यायां वृद्धिः अभवत्। इदानीं देशे २३ IIT, २१ IIM, तथा २० AIIMS संस्थानानि सन्ति।

## अन्तर्राष्ट्रियप्रसारः-

जाञ्जीबारे अबुधाब्यां च द्वौ अन्तर्राष्ट्रिय-IIT-परिसरौ अपि स्थापितौ।

### नामांकन-विवरणं तथा डिजिटलीकरणम्

अखिल-भारतीय-उच्चशिक्षा-सर्वेक्षण (AISHE) २०२२-२३ अनुसारं, छात्र-नामांकनं २०२१-२२ वर्षे ४.३३ कोटि-तः वर्धित्वा २०२२-२३ वर्षे ४.४६ कोटि-पर्यन्तं जातम्।

## राष्ट्रिय-क्रेडिट-प्रारूपम्-

एकादश-शतं (१७०) विश्वविद्यालयाः शैक्षणिक-कौशल-आधारित-शिक्षां संयोजयितुं 'राष्ट्रिय-ऋण-ढाँचां' (National Credit Framework) स्वीकृतवन्तः।

## एकेडमिक-बैङ्क-ऑफ-क्रेडिटः

अस्मिन् २,६६० संस्थानानि सम्मिलितानि सन्ति, यत्र ४.६ कोटि-तः अधिकाः परिचयपत्राः (ID) निर्गताः। अस्मिन् २.२ कोटि 'अपार' (APAAR) परिचयपत्राः अपि सन्ति।



## अनुसन्धानं तथा तकनीकी-शिक्षा

देशे अनुसन्धान-संस्कृतिं प्रवर्धयितुं 'अनुसन्धान-राष्ट्रिय-अनुसन्धान-फाउण्डेशन' इत्यस्य स्थापना कृता अस्ति। तकनीकी-शिक्षायाः गुणवत्तार्थं १७५ अभियान्त्रिकी-महाविद्यालयान् (Engineering Colleges) तथा १०० पॉलिटेक्निक्-संस्थानानि सहितं २७५ तकनीकी-संस्थानेषु बहुविषयक-शिक्षा-सुधारयोजना प्रचलति।

**निष्कर्षः:** एनईपी-नीतेः मुख्योद्देश्यं भारतीय-शिक्षा-प्रणाल्याः आत्मनिर्भरता, वैश्विक-मानकानां अनुरूपता, तथा उच्चशिक्षायाः अन्तर्राष्ट्रियकरणं वर्तते, येन विदेशी-छात्राः आकर्षिताः भवेयुः तथा च भारतीय-छात्राणां विदेश-पलायनं न्यूनं स्यात्।





✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# श्रीभगवत्प्रार्थना

ईश्वरप्रार्थनायां विशेषतया कृपाशक्तिः तिष्ठति । मनुष्यस्य अन्तःकरणे स्थितं शोकचिन्ताक्लेशादिकं प्रार्थनायाः सत्प्रभावतः दूरं गच्छति । शनैः मनःप्रसन्नता वर्धते, शान्तेरनुभवः भवति । सेवाकार्यादिभावः मनसि उत्पद्यते, तदर्थं प्रेरणा प्राप्यते । जीवने कृतं कर्म सफलतां गच्छति । तस्मात् नियमितरूपेण प्रतिदिनं मनुष्येण भगवत्प्रार्थना कर्तव्या।हे परमसखे ! श्रीकृष्ण ! हे अच्युत भगवन् ! श्रीलक्ष्मीदेव्याः करकमलाभ्यां सेवितस्य भवतः चरणारविन्दस्य शरणं प्रति आगतम् एवं भयङ्करे भवसागरे निमज्जितं मां कृपया उद्धर । त्रिगुणमय्या मायारूपिण्या मृगतृष्णया यस्य बुद्धिः नितरां चापल्यं गतमस्ति, यस्य दशेन्द्रियाणि विषयभोगार्थम् उत्कण्ठितानि सन्ति, यः दुष्टमनुष्यैः अपमानितः स्यात्, मृतवत् स्वबुद्ध्याः कारणतः येन भगवच्छरणमपि त्यक्त्वा सांसारिकगुणानां शरणं स्वीकृतमस्ति, यः सदैव भयभीतः, कामादिषट्शत्रूणां जाले निपतितः 'त्राहि त्राहि' उच्चारयन् भ्रममाणः स्यात्, स न कोऽपि, अपितु अहमेवास्मि । हे प्रभो ! कालिन्द्याः प्राणनाथः त्वमसि, परन्तु तव चरणारविन्दपरागेण सर्वथा शून्यः अस्म्यहम् । मनश्शोकस्य, बुद्धिभ्रमस्य च नाशार्थं समागतः अजन्माः त्वमेव असि । तव मुखकमलस्य दर्शनाभिलाषिणं, तथा लक्ष्म्याः करकमलाभ्यां सेवितस्य तव चरणकमलस्य शरणं प्रति आगतं मां कृपया उद्धर ।

कालिन्दी, रुक्मिणी, राधा, सत्यभामा, जाम्बवती इत्येतासां सुहृद् त्वम् असि, एवं स्वशरणागतानां भक्तानामुपरि कृपां कृत्वा तेषां भवभयाद् विमोचकः, वरदः, गोपबालानां प्रियतमः, रासक्रीडायाः अधिनायकः, गोवर्धनधारी, मधुसूदनः, सर्वेश्वरः, अत्यन्तं कमनीयः, गुणाश्रयः इत्यादिभिः नानासद्गुणैः, नामभिश्च त्वं विभूषितोऽसि, त्वां शिरः अवनमय्य अत्यन्तं श्रद्धया प्रणमाम्यहम् । रे मनः ! त्वं सर्वदा यज्ञेश्वरस्य श्रीकृष्णस्य हि भजनं कुरु । हे परमसखे ! लक्ष्म्याः करकमलद्वारा सेवितस्य तव चरणारविन्दस्य शरणागतं मामुद्धर -- इत्येवम् आर्तः भूत्वा, शरणागतः सन्, लगनतया च सततं भगवत्प्रार्थना करणीया मनुष्येण इति, शुभमस्तु ।



# "लौकिकन्यायकोशः"
# "सौधसोपानन्यायः"

एकैकसोपानस्य अधिरोहणं विना साक्षात् एव सौधाग्रस्य अधिरोहणम् अस्य अर्थः। कोऽपि एवं कर्मप्रयत्नं विहाय सहसा फलं प्राप्तुम् इच्छति चेत् अस्य न्यायस्य प्रवृत्तिः भवति। कर्ममुक्तिः सद्योमुक्तिः इति वेदान्ते स्थितिद्वयं कथितम्। सद्योमुक्तिः सौधसोपानन्यायम् अवलम्बते इति भावः।

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्



# अवताराः

पुराणशास्त्रे कथयन्ति- अवताराणां त्रिभेदाः सन्ति।



१) पूर्णावतारः
२) अंशावतारः
३) कलावतारः

**अंशावतारः-**
यदा अधर्मः बाह्यरूपेण उग्रः भवति, तदा ईश्वरः स्वशक्तेः अंशं प्रकटयति। उदाहरणार्थम्- नरसिंहः, वामनः।

**कलावतारः-** यदा अधर्मः आन्तरिकरूपेण अज्ञान– अहंकार– आसक्त्यादिरूपेण वर्धते, तदा ईश्वरः गुणरूपेण अवतरति। उदाहरणार्थम्- व्यासः, कपिलः, बुद्धः।

**पूर्णावतारः-**
यदा सम्पूर्णस्य युगस्य परिवर्तनम् अनिवार्यं भवति, तदा ईश्वरः स्वयमेव प्रकटते। यथा श्रीकृष्णः।

गणेशतत्त्वम् (त्रिनिमेषात्मकम्)
मुद्गलपुराणे उच्यते-
गणेशः नित्यसिद्धं ब्रह्मतत्त्वम् अस्ति। स न जायते, न म्रियते। किन्तु मानवस्य आन्तरिकदैत्यनाशार्थं सः अंशरूपेण प्रकटते। वक्रतुण्डः, एकदन्तः, लंबोदरः इत्यादिरूपैः। अतः एते अवताराः अंशावताराः।
"गणेशः न केवलं बाह्यविघ्नहर्ता, अपि तु आन्तरिकदोषनाशकः।"

सुधा साठये, मुंबई।

# हास्यकणिका

### पति-पत्न्योः मध्ये हासपरिहासम्

**पतिः-** भवत्याः मतेः पतिः कः अस्ति?
**पत्नी-** मम मतौ तु पतिः सः अस्ति यः एकाहोरायाः पर्यंतं भाषणं दत्त्वा वदति- अहं तु भवत्याः कल्याणार्थं वदामि सर्वदा 🤣 😅
**पतिः-** 🙄 😳 😳 😳 😳

हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# भारतदर्शनम्- तिरुवनन्तपुरम्

तिरुवनन्तपुरम् केरळराज्यस्य राजधानी अस्ति । इदम् एकं सुरम्यं नगरम् । अत्र अनन्तशायिनः श्रीविष्णोः मन्दिरम् अत्यन्तं प्रसिद्धम् अस्ति । अत्रत्य जनसंख्या ९००,००० परिमिता अस्ति । केरलराज्यस्य राजधानी तिरुवनन्तपुरजनपदस्य आस्थानं च भवति तिरुवनन्तपुरम् । भारतस्य पश्चिमतीरे दक्षिणाग्रे इदं नगरं विराजते । उन्नतावनतभूम्या अतिवेगयुक्तमार्गैः अनलसवाणिज्यमेखलया च सम्पन्नं भवतीयं सुन्दरनगरी । अस्माकं राष्ट्रपतिमहाभागेन महात्मागान्धिवर्येण नित्यहरितनगरम् इति तिरुवनन्तपुरमुद्दिश्य कथितम् । २०११ तमवर्षस्य गणनानुसारम् अस्मिन् नगरे १००००० जनाः वसन्ति । केरलराज्यस्य अत्यधिकजनसान्द्रतायुक्तनगरम् इदमेव ।तिरुवनन्तपुरम् इति नाम तिरु-अनन्त-पुरम् इति पदत्रयात् रूपीकृतम् इति प्रबलविश्वासः । नगरस्य मुखमुद्रारूपेण गणितस्य श्रीपद्मनाभस्वामिमन्दिरस्य नामसम्बन्धी भवतीदं नाम । सहस्रशिरोयुक्तस्य अनन्तसर्पस्य उपरि शयितस्य महाविष्णोः रूपम् अस्मिन् मन्दिरे आराध्यते ।तिरुवनन्तपुरतः १८ कि.मी दूरे विद्यमानं समुद्रतीरसुखबासकेन्द्रम् । समुद्रयुखास्थिताः महाशिलाः तरणाय अचिता अननाधता, आतपसेवायै उचितं सिकतामयं विशालं तीरम् इत्येतानि आकर्षकाणि । नेटयार डाम्-नगरात्, २९ कि.मी, उत्तरपूर्वादिशि । लधुवन्यभृगर्सरक्षणकेन्द्रम् । निटिनिकरमध्यसंस्थः तडाणः आकर्षकः ।श्रीपद्मनाभस्वामिमन्दिरम् सुवर्णनिर्मिता अन्तशाचिनो विष्णोः मूर्तिरेव प्रतिष्ठा । भारते संपत्समृद्धौ प्रथमस्थानं वर्तते अस्य मन्दिरस्य्।केरळराज्यस्य राजधानीस्थाने स्थितम् एतत् नगरम् त्रिवेण्ड्रम् इत्यपि ख्यातम् अस्ति । भारते दक्षिणपूर्वप्रदेशे अरब्बीसागरपश्चिमघट्टयोः मध्ये सप्तपर्वतानाम् उपरि विद्यमानम् एतत् नगरं रमणीयम् अस्ति । अस्य पौराणिकं नाम शयना नन्दूरपुरमिति । इतिहासानुसारं तिरुवनन्तपुरं तिरुवाङ्कूरुसंस्थानस्य भागः आसीत् ।



# वार्ता-संवादः

**नन्दिनीः** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्याः** नमस्ते नन्दिनि। श्रूयताम्, अमेरिकादेशस्य सुरक्षाप्रमुखेन 'चैट-जीपीटी' (ChatGPT) इति यन्त्रे आधिकारिकपत्राणि स्थापितानि। अतः सः निन्दितः।
**नन्दिनीः** एतत् तु प्रमादपूर्णं कार्यम्। अपरस्मिन् वृत्ते, अमेरिकाम् त्यक्त्वा भारतं प्रत्यागतेन एकेन भारतीयेन 'उत्तमः निर्णयः' इति प्रोक्तम्। तेन सन्तोषः प्रकटितः।
**काव्याः** गृहं तु सर्वदा रमणीयम्। अपरं शृणु, 'माइक्रोसॉफ्ट' संस्थायाः कर्मचारिणा लिखितम् यत् "कोऽपि भवन्तं रक्षितुं न आगमिष्यति" इति। वृत्ति-विषये इदं कटुसत्यं कथितम्।
**नन्दिनीः** सत्यं खलु। अन्ते, 'मेलानिया-ट्रम्प' महोदयायाः नूतन-वृतचित्रस्य प्रदर्शनं आरब्धम्। तत्र धनस्य महान् व्ययः कृतः, किन्तु जनैः मिश्रित-प्रतिक्रिया दत्ता।